No. ४१ ग-१

Title पंचपादिका विवरणम् ([illegible])

Author प्रकाशात्म भगवान्

Extent ५१ पत्र  Age सं. १९८८

Subject वेदान्त

[illegible]

त्रि ४२८०

३ शिव
पाद

८१

विवर० ॐश्रीगणेशायनमः नन्वत्रलोकेथशब्दस्यचत्वारोर्थाद्दृष्टव्यवहारेप्र ब्र० पा०
१ योगसामर्थ्यात्प्रसिद्धाः आनंतर्यमधिकारोमंगलाचरणंप्रकृता ३
द्र्थादर्थांतरत्वंचतत्रइत्तरपर्युदासेनानंतर्यमथशब्देनोपादी
यतइत्यस्मिन्नर्थेसतिचानंतर्यार्थत्वइत्यतः शंकरभाष्य
स्यतात्पर्यमाह नत्वाथशब्द आनंतर्यार्थइत्यादिना कथं
जिज्ञासाशब्दस्यावयवार्थेनार्थवत्वेतन्नीच्छायाः कर्तव्यत
याप्रारंभानुपपत्तेः प्रत्यधिकरणंचाप्राप्तिपाद्यत्वान्नाधि
कारार्थोथशब्दः ब्रह्मज्ञानेछायामंगलाचरणार्थत्वस्यप्र
सिद्धतरत्वाद प्रसिद्धत्वेपिप्रशंसापरत्वेनार्थवादत्वप्रसंगा
त्स्वरूपस्यनमंगलाचरणार्थता इच्छायाश्चकुत्रचित्सिद्धत्वाद न
र्थादर्थांतरभावस्यप्रसिद्धतरत्वान्नाभिधातेनैकृत्यमिति
अथशब्दस्यनतदर्थतेति नान्विच्छायाः कुत्रश्चिदानंतर्य
मपिप्रसिद्धं सत्यं हेतुफलभावेतानंतर्यस्याविवक्षितत्वात्
आनंतर्याभिधानमुखेनपूर्वप्रकृतपुष्कलकारणमथशब्दे
नावबोध्यतेन ब्रह्मज्ञानेप्रवृत्तिपर्यंतछोदयसामर्थ्यादेव

उष्कलकारणमनुमीयते किमथशब्देन सत्यं इच्छोदयप्रभृतीष्य
माणज्ञानोदयपर्यन्तस्य कार्यस्य उष्कलकारणत्वात् पूर्ववृत्त
स्य शास्त्रीयस्याधिकारिविशेषणस्य प्रतिपत्तिपरत्वात् अ
थशब्दस्य न दोषः ननु प्रतिपत्तिरिष्यमाणज्ञाने प्रवृत्तिः
पर्यन्ते इच्छोदयघोरणाप्रवृत्त्यंगभावं भजत इति नेनानन्तर्या
भिधानमुखेन प्रवृत्तिनिमित्तविशिष्टेच्छोदयप्रभृतिज्ञानो
दयपर्यन्तस्य कार्यस्य उष्कलकारणत्वात् पूर्ववृत्तसाध
नचतुष्टयावबोधनतयानेनानन्तर्यार्थोऽथशब्द इति सूक्तं ननु
जिज्ञासाशब्दस्य विचारप्रसूतस्य कल्पमवयवार्थेनार्थवत्त्व
मादीयते रूढिर्हि योगमपहरतीति न्यायादित्याशंक्यापत्ति
अपेक्षजिज्ञासाशब्दो विचारवचन इत्यारभ्योच्यत इत्य
तः प्राक्तनेन ग्रंथस्य स्वार्थः उच्यते नायं जिज्ञासाशब्द इत्या
दिपरिहारीयमाशयः चत्वारः शब्दस्य वृत्तिप्रकाराः तत्र रू
यष्याद्वृद्धव्यवहारेऽभिधानाभिधेयव्यतिरिक्तमनपेक्ष्यैव प्र

विवर० योगसामर्थ्यादष्ठवंडाभिधानसंबंधः योगः समासादिनैक व० पा०

२ पदत्वमापन्नस्य शब्दस्य स्वावयवगतानेकाभिधानशक्तिद्वा ३

रेणाविशिष्टार्थाभिधानं एतच्चोभयमुख्यवृत्तिरित्युच्य

2 ते गोशब्दः स्वाभिधेयादर्थान्तरे लक्षणया वृत्तिरिति तत्रैक

स्यैव शब्दस्यार्थान्तरे रूढस्यार्थान्तरे च योगवृत्तिसंभवे रूढि

र्योगमपहरतीति न्यायेन योगपरित्यज्य रूढिरूपादीयते

ग रूढियौ मुख्यवृत्तिसंभवे गौणाः परित्यज्यन्ते तत्रैकस्मिन्नर्थे

शब्दस्य योगवृत्तिसंभवे तत्रैव तस्यैव शब्दस्य रूढिर्न कल्प्य

ते क्लृप्तसामर्थ्येनैव प्रतिपत्तिसंभवे तत्रैव तस्यैव शब्दस्य

शक्त्यन्तरकल्पनानिमित्तकार्यान्तराभावात् ननु पंकज

शब्दादिषु योगरूढिरिति वृत्त्यन्तरं वा शक्तिद्वयं वा कल्प्यत

इति न तत्रापि योगवृत्त्यैवार्थप्रतिपत्तेः ननूत्पलादिवस्त्व

यपंक न्तरं विहाय जशब्दात् सटितितामरसे प्रतिपत्तिदर्शनात् श

क्त्यंतरमेव कल्प्यतीयं न प्रयोगबाहुल्यादपि सामर्थ्यावि

शेषेप्रतिपत्तिदर्शनाद्यथानवस्त्वर्थेषु शास्त्रविशेषोपिनोपशास्त्रात्
सामान्यादिमदाहृतैर्प्रयोगवाकुल्यादेवप्रथमप्रतिपत्तिः तस्माच्छ
ब्दसामर्थ्यादेवप्रयोगप्रतिपत्तिसंभवेनशास्त्रांतरकल्पनेत्यो
हे नायंजिज्ञासाशास्त्रइति कथमित्यतः प्राक्तनोग्रंथः
स्पष्टार्थः नन्ववयवार्थसंसर्ग एव योगरूढ्यापिशब्देनप्रतिपा
द्यतेविचारस्तुनजिज्ञासाशब्दावयवार्थः कथंतद्वगमः
स्यच्छब्दसामर्थ्येनैवान्यथासिद्धिरितिचोदयति कथमन्य
थासिद्धत्वमितिस्वयमवयवार्थत्वाभावेप्यवयवार्थसंसर्गा
विनाभावादपितत्रलक्षणायाप्रयोगप्रत्ययोपपत्तौ नशा
स्त्रांतरकल्पनात्मकमन्यथासिद्धकार्याभावादिति परिह
रति किंतत्कारणं विचारार्थत्वादिति ननुज्ञानमात्रमिष्यमा
णंकथंविचारेणाविना रूढ्यामितितदाह तथाहीति किं
तत्रप्रमाणमितितदाह हेवंप्रयोगप्रत्यययोरिति ज्ञानंख
ल्विष्यमाणंविषयेणासहावगत्तमिष्यते अतनवगतविष

विवर० यच्छायोगात्तत्स्वप्रतिपन्नेवस्तुनिज्ञानमिष्यमाणंसंदिग्धे त० पा०
२ निश्चयफलंवापरोक्षेऽपरोक्षफलंवेष्यतेतेनद्योभयंप्रमाणा २
दिविचारप्रयत्नसाध्यमितिप्रतिपन्नेवस्तुनिविशिष्टज्ञा
3 नमिष्यमाणंप्रमाणादिविचारमविनाभावेनकाममपत्तीर
तिविचारसाध्यज्ञानेप्रयोगमन्यथयाविन्यत्यर्थः नन्वेते
च्छामात्रंस्वेनप्रतिपाद्यते प्रयोजनाभावात्किंत्विष्य
माणज्ञानप्रदर्शनमुखेनतत्साधनंविचारमंतरंगमिमु
पलक्ष्यएवनान्यथैवप्रतिपाद्यतेऽतोविचारज्ञानबल
रागामन्यतमस्यतात्पर्येणप्रतिपाद्यस्यारंभायाथशब्द
इतिचोदयति नन्वेवमपिकुतएतदिति नेदंवप्रपंचय
ति अंतरंगतिंविचारमाश्रित्येति अर्थलक्षणेनप्राधा
न्येनांतरंगत्वंविचारमाश्रित्येति संबंधः अत्रस्वपारणा
मन्यतमस्याधिक्रियमाणत्वमंगीकृत्येतियोजना
तत्राथशब्देनानंतर्याभिधानमुखेनशास्त्रोपसाधन

वत्तृत्वसंपन्नाधिकारिविशेषस्यान्यायतः समर्प्यमाणा
भावे विचारारंभपर्यन्तमेव कर्त्तव्यतया विधीयमानो वि
चारो निरधिकारोऽननुष्ठेयः स्यादिति परिहरन्ति उच्य
ते शास्त्रस्यानारंभप्रसंगादिति ननु विचारविधिरेव वि
श्वजिन्न्यायेनाधिकारिविशेषं कल्पयित्वा प्रवृत्तिपर्यन्तो भ
विष्यतीति किमध्ययनविधिनेति ननु कर्त्तव्यतया वगतो
विचारोपि प्रारंभमर्थाद्गमयतीति किं विचारारंभार्थेनाध्य
यनविधिनेति ननु विधिसामर्थ्यादुभयप्राप्तौ कस्तत्र निर्णयो
विधेयपदार्थानोपाधित्वादात्तस्य विधानमुखेनाधिका
रिसमर्पणमेव युक्तमित्यपाद्याधिकारार्थत्वे ह्यप्रयोजन
मिति प्रवृत्तिद्वारेण प्रयोजनपर्यन्तत्वं प्राप्त्यामित्यर्थः ना
नुमेयत्वकामः कल्पनेन प्रसक्त्यप्रतिषेधप्रसंगात्तथा
हि कर्त्तव्य इत्युक्तेऽविशेषावाप्तावधिकारि प्रतिपन्नो तदनु
पपत्त्या विशिष्टाधिकारः कल्पनीयस्तत्तावदेषा हैनैव विरि

विवर० ष्टाधिकारिसमर्पणमितिभावः ननुरात्रिसत्रन्यायेनार् र० प०
४ र्थवादगतमेव मोक्षं वा लक्षणं वा प्रयोजनं साध्यत्वेन परि ३
मप णम्यातकामो वा लक्षणकामो वा विचारयेदिति विधिप्र
तिपत्तिस्तमयाधिकारिविशिष्टविधिप्रतिपत्तेः न प्रस
ज्यप्रतिषेध इति चोदयति ननु व लक्षणं प्रयोजनमिति
न त्वेदवक्तव्यं किं सर्वेषां फलकामित्वया सर्वाधिकारं
शास्त्रमुच्यते किं वा विशिष्टाधिकारमिति विशिष्टाधि
कारत्वे विधिप्रतिपत्त्यधीनत्वादर्थवादसामर्थ्यलभ्या
धिकारिकल्पनायाः प्रसज्यप्रतिषेधव्यापारगौरवं तद
वस्थमेवातो ऽथ शब्देनाधीतव्यादिविधिप्रकरणापठि
तसाधनचतुष्टयसंपन्नाधिकारिप्रतिपत्तिपूर्वकोविचा
रविध्यवगमेनासौ दोष इत्यथ शब्देनाधीतविशेषाधिका
रिसमर्पणमेवयुक्तमिति अथ सर्वाधिकारं शास्त्रमिति
न प्रसज्यप्रतिषेधेनापि विशेषाधिकारिसमर्पणेशाद्

पेदेति तत्रवक्तव्यं किंफलं न सर्वाधिकारं शास्त्रं किं वा विधि
तोतत्तावत्फलं न सर्वेषां फलार्थित्वाभावादित्याह न ब्रह्म
ज्ञानेऽर्थित्वानुपपत्तेरिति नामुमुक्षुज्ञानार्थित्वेत्यतः प्राप्त
नो ग्रंथ्यः स्पष्टार्थः ननु अध्ययनविधेः त्रैवर्णिकाधिकारत्वा
त्तत्प्रयुक्तत्वाच्च विचारस्याविधित एव सर्वाधिकारं शास्त्रमि
ति वादयति नामुमुक्षुज्ञानार्थित्वेति ननु विधिना स्ववि
षयस्य तदुपकारकस्य वानुष्ठाननिमित्तं भवति न च वि
चारोऽध्ययनविधेर्विषयस्तदुपकारको वा तत्कथमध्ययन
विधिविषयो विचारश्चेत्तत्राह स्वाध्यायाध्ययनस्यार्था
वबोधफलत्वादिति अयमाशयः दृष्टफलस्याध्ययनविधेः
यावदर्थावबोधफलव्यापारान्तं विचारमपि फलनिष्पत्तये
ऽध्ययनविधिरनुष्ठापयति इति न तु विषयतदुपकारित्व
तिरिक्तस्य व्यापारस्य फलनिष्पत्त्युपपदतया विधिप्रयुक्तानुष्ठे
यत्वं क्व दृश्यते अवघातादिष्विति विवक्षितविधेयावघातस्ये
व फलपर्यन्तमावश्यकत्वान्न त्वविचारस्त्वेतत्र ... वाप्यन्तर
मेवं

विक्र॰ कथं विधीयत इति वक्तव्यम् नैष दोषः आगृहीतस्यावि न्द॰पा॰
५ हितस्याविहितस्यैव कारकस्य वा विधेः फलपर्यन्तानुपप ३
त्त्या विधेयत्वकल्पनवद्विचारस्यापि तदुपपत्तिरिति ते
त्र किं विचारसाध्यज्ञानमर्थनिश्चयफलम् अध्ययनस्यान्व
यव्यतिरेकसिद्धं दृष्टं फलं किं वा तदुद्देशेन विधानादधि
कारिविशेषपरतया शास्त्रीयं फलं किं वा विधिप्रयोजनपर्य
न्तसामर्थ्यलभ्यं — — फलमिति नेत्यावदृष्टफलं ह्यध्ययन
मात्राद् वृत्तिगुणाकादप्यर्थनिश्चयानुदयात् । आपातदर्श
नस्य चाविचारानपेक्षत्वात् ततोऽर्थनिश्चयदृष्टफलाध्य
यनक्रियेति सिद्धं जयति स्यादेवमर्थविबोधफलाध्य
यनक्रिया स्यादिति ननु तव्यप्रत्ययेन स्वव्यापारः शाब्द
भावनाविधिरूपतयाभिधीयते सा च शाब्दभावनाध्ययन
करणिकामर्थभावनां निष्पादयन्ती फलवदर्थावबोधं
रूपार्थमर्थभावनाभाव्यत्वेन कल्पयति । तत्र रूपार्थे

पुरुषप्रवृत्त्युपयोगात् तत्तच्छब्दभाव्यान्तरालाभात् समानपदो
पात्तमध्ययने भावनायाः करणान्तामापन्नं भाव्यस्यार्थाव
बोधस्य निर्वर्त्तकतया करणा भवति कुठारादीनामपि छि
दिक्रियाभाव्यद्वैधीभावनिर्वर्त्तनद्वारेण छिदिभावनाकर
णत्वप्रदर्शनात् अतोऽध्ययनविधेः प्रवर्त्तकत्वान्यथानु
पपत्तौ वार्थभावनाकरणस्याध्ययनस्यार्थावबोधः फ
लमिति सिद्धमन्यथा समानपदोपात्तस्याध्ययनस्यैव
भाव्यतया स्वाध्यायावाप्तेरपि विधिफलत्वाभावप्रसंगा
दित्यत आह साध्यधीयमानो वाप्तिफलत्वादुक्तरयुहणां
तेन्यघमात्रापा नव्यप्रत्ययेन भावनाकर्मकारकोऽभिधी
यमाने स्वाध्यायस्यावाप्तिफलेव न भाव्यान्तरं कल्पनीयं ।
भावनाकर्माभिधायि शब्दविरोधादिति ननु न भाव्यमा
त्रेणापुरुषप्रवृत्तिर्विधिनोजात्यते किंतु पुरुषार्थभाव्या
पेक्षायैव तत्तच्छब्दविरोधेऽपि भावनानिष्पत्तये र्थावबो
धो भाव्यस्तिर्यकाते अपादानग्रहणानिष्प्रयोजनमि

विवर॰ तिपरिहरन्ति भवतु तर्हि सन्तूनां गतिरिति अयमाशयः त॰पा॰
८ अर्थनिर्णयस्याध्ययनमात्रादनिष्पत्तेः श्रूयमाणस्य २
6 स्वाध्यायस्य चाफलत्वात् अध्ययनमात्रस्य चाप्रयो-
जनत्वाभावात्स्वाध्यायाध्ययनेन स्वर्गंभा
वयेदिति कल्प्यत इति ननु व्याकरणस्याप्यंगत्वात्सां
गाध्ययनाद्विधीयमानात् अर्थनिश्चयो दृष्टफल
तयाजायते तस्य च विरोधपरिहाराय विचारः प्रयु
ज्यते तेनादृष्टे सत्यदृष्टकल्पनानन्त्यापत्ति बोदयन्ती
तदपि नान्तरेभ्यः प्रयोजनवादिति परिहरन्ति न तर्हि
निःप्रयोजनतानीति श्रूयमाणस्वाध्यायलक्षणात्क
र्मण एवाध्ययनभावनया भाव्यमानात् फलवदर्था
वबोधसिद्धेः पशुवत्त्राग्यादीनां प्रयोजनं प्रतिपरंपरया-
साधनानामपि भाव्यत्वदर्शनात् श्रूयमाणस्वाध्याया
वाप्तिपर्यन्त एव विधिव्यापार इति भावः नन्वक्षरग्रहणा

पर्यंते विधिव्यापारे फलवदर्थावबोधस्य निर्निमित्तत्वास्यादिति तत्रा
फलप्रयुक्त एवार्थावबोध इति अयमाशयः लौकिकानां वाक्यानां
विधिमंत्रेणापि फलवदर्थावबोधकत्वदर्शनात्सांगात्त्वकर्मणो
विधीयमानादवघातादिप्रिवादृष्टजन्माति धमान्न विधिफलमर्था
वबोधः किंतु स्वीकृतत्वाध्यायमात्रजन्यं फलमिति विधेस्तु दृष्टसम
मेव बाप्यदृष्टं किंचित्फल – मिति दृष्टफलाविरोधेनादृष्टसिद्धौ न तद्वि
रोधिस्वतंत्रादृष्टं कल्पयितुं युक्तमिति किंच फलवदर्थावबोध
फलोध्ययनविधौ यस्मिन्कर्मण्यधिकारस्तस्य तद्वाक्याध्ययनमे
वस्यान्न वाक्यांतराध्ययनं तत्र प्रवृत्त्यादिफलाभावादिति न कृ
त्स्नवेदाध्ययनसिद्धिरित्याह अपि चाद्यपग्रहणांतो विधिरिति
ननु कृत्स्नस्वाध्यायाध्ययनस्य नित्यतया विधेयत्वेपि सकलस्वा
ध्यायावाप्तिस्तमवेत स्यादृष्टस्यानधिकृतकर्मवाक्यगतस्यार्था
वबोधात् ध्यानादिवारेणाकल्प्यमपूर्वसिद्धिहेतुत्वेनेति नैव दोषः
प्रायश्चित्तजपादावपूर्वोपकारित्वोपपत्तेः नन्वध्ययनाद्दाराव

विवरण त्रे: कोऽविशेषोऽस्त्यत्राविशेषः स्वाधातोच्चारणाद्नमत्वं नामादरयर्मो न्०पा०

वाक्षित्तदर्थो वाङ्ज्ञनसव्यापारोध्ययनमिति तन्वाधिकारिवि २

शेषणामर्थावबोधमुद्दिश्यैँगप्रयुक्तशब्दोच्चारणोलोकेतात्पर्य

दर्शनादिति चोदयति तनुचाश्रूयमाणाधिकारोध्ययनविधि

रिति अधिक्रियते अस्मिन्कर्मणीतेत्याधिकारोविधिप्रकृत्यसं

वंधनिमित्तं जीवनकामादिरुच्यते तनुविश्वजिन्यायेनाधि

कारः कल्प्यतामथवावाजसनेयितांब्रह्मचर्यमागामित्यादि २

नोपनयनस्य प्रकृतत्वादुपनीतोऽधिकारी त्रिप्रकरणाप्रमाणेन

कल्प्यतामिति तेत्याह दृष्टस्यादरग्रहणेऽर्थावबोधः सकल्प

नामधिकारस्यनिरुंधन्नित्यादिना भवतुनामाध्ययनेना

-र्थाविबोधंभावयेदर्थावबोधकाम इति विधिस्तथापि किं चारे

णार्थावबोधंभावयेदिति किं चारे प्रवृत्तिरध्ययनविधिनानवि

धीयत इति तत्राह दृष्टाधिकारेषु प्रत्यवतत इति तत्र किमर्थो

सामर्थ्यादेवाध्ययनस्यार्थावबोधः साक्षात्परंपरया वा फलमि

ध्ययनं विधातव्यं निरधिकारविधानायोगात् अर्थावबोध
मुद्दिश्यैव च विधितः शब्दोच्चारणोसन्निवाक्यस्य तात्पर्यमिति
र्थावबोधमुद्दिश्य ४ पं० ३

त्युच्यते किंवार्थावबोधकाममुद्दिश्य विधानमित्यभिप्रेत्याहार
त्रोच्यत इति प्रथमः कल्पोंगीकृत इत्याह भवेदध्ययनविधेरिति
द्वितीयः पक्षोनुपपन्न इत्याह नाधिकारहेतुत्वेति अत्राध्ययना
त् प्रागर्थावबोधस्याप्रतिपन्नस्य कामनायोगान्नार्थावबोधका
ममुद्दिश्य विधानमित्यर्थः ननु कथमर्थावबोधस्याप्रतिपत्ति
रध्ययनात्प्रागेवार्थस्याप्रतिपत्तेर्विशेषरूपापरिज्ञानेनाविशि
ष्टावबोधानवगमात् ननु वेदस्य प्रागपि वाक्यप्रमाणत्वात् आप्त
प्रवचनवदर्थो विद्यत इत्यर्थसद्भावमात्रमनुमानेनावगम्यते तै
र्थवत्वज्ञानमात्रस्यानुमानसिद्धत्वात् ज्ञानकामनायोगात् अ
ग्निहोत्रादिविशिष्टवाक्यार्थो नाम प्रतिपत्तव्यस्तद्विशिष्ट
ज्ञानकामनायोगादुपदेशात् एवाग्निहोत्रादिवाक्यार्थविशे
षाः प्रतिपन्ना इति चेत् तर्हि वाक्यार्थविशेषज्ञानानामपि सिद्ध
त्वात्तत्र कामनासंभवेदर्थोपदेशिकज्ञानस्याप्रमाणत्वात्
तत्रातिशयिज्ञानं काम्यत इति चेत् अप्रामाण्यनिश्चितेन तत्राति

विवरण र्णीयज्ञानकामनार्थस्यविभ्रममात्रत्वादौपदेशिकज्ञानस्यसंदिग्धप्रा न०पा०
८ माण्येतत्प्रामाण्यविचारस्यैवावसरोनाध्ययनस्यकिंचसर्वेषा ३
कृत्स्नार्थज्ञानानांयुगपदेकबुध्योपदेशनासंभवात्सामान्येनोद्दिश्य
8 शब्दोच्चारणायामर्थमात्रज्ञानेशब्दस्यतात्पर्यप्रसंगादग्निहोत्रादि
विशेषज्ञानेतात्पर्याभावात्तत्वाक्यशक्त्यनुसारेणविशिष्टार्थ
तात्पर्यकल्पनायामर्थज्ञानमुद्दिश्यविधानेविधेस्तात्पर्यानिमि न
त्तत्वप्रसंगात्तस्माद्विशेषज्ञानानांप्रागसिद्धत्वान्नतत्काममुद्दि
श्यविधानमित्याह ----- प्राक्काधिकारज्ञानेनप्रयोजनमित्ति
किंचोद्दिश्यविधानेपिनाध्ययनमात्राद्दृष्टफलतयार्थावबोधसि
द्धिरदर्शनादित्याहतेनेतिविधेरिति नन्वर्थावबोधमुद्दिश्यशब्दो
च्चारणायांतात्पर्यंलोकेदृश्यते नतावच्छ्रोतुरुच्चारणेतात्पर्यानि
मित्तंलोकेतदभावात्तुवक्तुरुच्चारणावेदपौरुषेयत्वेतात्पर्याभावप्र
संगात्तस्मात्स्वभावतएवार्थप्रतिपादनसमर्थस्यशब्दस्यस्वरूप
संबंधज्ञानदोषपरिहारायार्थज्ञानमुद्दिश्यशब्दोच्चारणापेक्षितेति

स्यार्थमपि शाब्दधर्म एव यद्यपि लिंगगम्यो न पुरुषधर्म इति वक्ष्यते।
इदानीमध्ययनविधेर्नित्याधिकारत्वं प्रतिपादयितुमधिकारि
विशेषणाभावादनध्ययनमेवेत्यध्ययनप्रवृत्तिमाक्षिपति य
द्येवमधिकारश्रवणादिति तत्राविधिर्हिंसाविषये प्रवर्तकतया प्र
तिपन्नस्तदन्यथानुपपत्त्या समर्थं नियोग इति प्रतिपद्य प्रवृत्ति
समर्थमधिकारिणं कल्पयति यदा तु पुनर्विधिविषयस्यानिमि
त्तान्तरादनुष्ठानं संपद्यते तदा विधेः प्रवर्तकत्वं प्रतिबध्यते प्रतिब
द्धप्रवर्तकभावश्चाविधिः प्रवृत्तिसिद्ध्यर्थं न स्वामिनमधिकारिणं कल्प
यित्वा प्रवर्तयति तत्राध्ययनविधिरपि स्वविषयस्याध्यापनविधि
प्रयुक्तानुष्ठानत्वात् स्वयं प्रतिबद्धप्रवर्तकभावो नाधिकारं कल्पयित्वा
प्रवर्तयतीति प्राभाकराः प्रत्यवातिष्ठन्त तन्न्यायाश्च केचिदाहुरिति
नन्वष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेति श्रुतावध्यापन
विधिरश्रूयमाणाधिकारः कथमध्ययनं प्रयोजयेत् कल्प्यते
त्वाधिकार इति चेत् न अध्ययनस्याधिकारं कल्पयित्वा स्वविधेः

विवरण प्रयुक्तिरेवाध्ययनस्यप्रवृत्तौ संनिधानात् ननुकाल्पिताधिकारे न्र०पा०
६ ध्यापनविधौतत्प्रयुक्तानुष्ठानत्वात्तत्राध्ययनस्यनत्राधिकारः ३
कल्प्यतइतिचेन्न विपरीतंकिंनस्यात् अध्ययनेकाल्पिताधिका
१ रेतत्प्रयुक्तानुष्ठानत्वादध्यापनस्यतत्राधिकारः कल्पनीयइति
ननुलिखितपाठादध्ययनसिद्धेर्नाध्ययनविधिरध्यापनंप्रयोर
जयति नह्यविधितोध्ययनेनाप्यत्र ध्यापनविधिसिद्धेर्नविहित
मध्ययनमध्यापनविधिः प्रयोजयेत् अप्याप्यध्ययनाध्यापन
योर्माणवकस्यग्राह्कृत्वस्य पवित्रपाणित्वाद्यंगसाम्याद्विहित
मेवाध्ययनमध्यापनविधिः प्रयुक्त इति अध्यापनस्याध्ययन
विधिप्रयुक्तत्वापि समानमेतत् किंचाचार्याधीनोवेदमधीयीतेति
नियमविधानाल्लिखितपाठोनयुक्तो ध्यापनानुजरभावित्वात्
आचार्यत्वस्यचार्यकरणविधिप्रयुक्तोधीष्वेतिवाक्यार्थइतिचेन्न
न ननुद्वितीयंजन्मनयस्मात्सआचार्यइत्युपनयमात्रादाचा
र्यत्वप्रवणादाचारान्ग्राहयतीति व्युत्पत्तेराचार्यत्वस्यप्रागे
वसिद्धेराचार्यकरणविधिप्रयुक्त इत्यध्याहाराच्छब्दस्यभाविवृत्त्या ६

अपरास्यैवलघीयस्त्वात् तस्मादधिकारकल्पनासाम्यादितरेत
रप्रयुक्तिसाम्याद्वृत्तविधिप्रयुक्तिसंभवे ध्ययनस्यकाम्यस्य ध्याप
नविधिप्रयुक्तिरितितथाह्याचार्यकरणविधिप्रयुक्तस्यानुष्ठ
ष्ठानमिति अयमाशयः संमाननोत्संजननाचार्यकरणाज्ञान
प्रभृतिविगुणानव्ययेष्वनियम इति संमाननादिषु साध्येषु
नयने धातोरात्मनेपदं विधीयते तत्रोपनयीततमध्यापयी
तेत्येकप्रयोगत्वावगमात् उपनयनाध्यापनयोः माणवक
स्याध्यापनं प्रतिकर्मकारकोद्देशेन उपात्तत्वात्माणवकः के
नोपकारेण ध्यापनविधिनिर्वर्त्यत्वे विवक्षितत्वाभ्युपगमेना
ध्यापनं कुर्वन्न ध्यापनविधेः उपकरोतीति गम्यते तत्रोपनीय
या ध्यापयेदिति प्रयोगैककल्पना यांतपत्य र्थका ध्यमेवाचा
र्यकरणं अत्र ध्यापनस्यापि फलं गम्यते तत्र श्योपनीया ध्यापयेदा
चार्यकरणकाम इति श्रुतेस्तस्यैवाचार्यत्वफलस्य कामोपपदं धर्मा
न्नकल्पनात्साधिकारो ध्यापनविधिः संपद्यते अत्र प्यवोपनीयपन्नु

विवरण यः शिष्यं वेदमध्यापयेद्द्विजः सकल्पं सरहस्यं च तमाचार्यं प्रच श्र०पा
१० क्षत इति उपनयनाध्यापनयोः प्रयोगैक्यादध्यापनेविधिश्रव ३
णादाचार्यत्वफलश्रवणाच्चाचार्यत्वकामो माणवकमुपनी
याध्यापयेदितिविधिर्निष्पद्यते अध्ययने तु नाधिकारनि
10 मित्तं किंचिदुक्तमस्तीति विशेषः नन्वध्यापनविधिविषय
तदंगत्वाभावे ध्ययनस्य स्वतंत्रविध्यंतरविहितस्य कथंस्व
तंत्रविध्यंतरप्रयुक्तानुष्ठानतेति तत्राह धरनस्यैव कामप्रयुक्त
त्वे प्रयुक्तस्यैतत्पमाशयः अथवा स्वर्गकामोऽधीतेति श्रूयते
तत्वं न तावत्पुरुषसुद्देश्यपरत्यागं श्रवणान्नित्यमध्ययनं विधीय
ते द्रव्यपरत्वया प्रोक्षणादिवत्कर्मकारकसंस्कारकर्मतया प्रती
तेः श्रूयमाणफलत्वाद्देवनस्य तंत्रकाम्याधिकारता
न च सक्तुन्यायेन गुणप्रधानवैपरीत्यान्नित्यकाम्याधिकार
तापदाहवनीये जुहोतीति संस्कृताग्नौ तत्तंत्रविनियोगा मां
त्तस्मादुभयविधाधिकारस्य स्यादित्यनाधानविधिराधानप्रवर्त

विलंद्रमः नर्त्हेन्नरकान्तुविधिप्रयुक्तानुष्ठानमाधानंस्या उच्यते
न तावन्नित्यदर्शपूर्णमासादिविधिप्रयुक्तानुष्ठानमाधानमाह
वनीयस्योद्देश्यतयानुपादेयत्वात् क्रतुविधिप्रयुक्तानुष्ठेयता
योगात् उपादेयमेवाहिविधिरनुष्ठापयति अन्यथा स्वर्गका
मादीनामप्यनुष्ठेयत्वप्रसंगात् स्मादुत्तरकाम्यविधिप्रयुक्तमे
वाधानस्यानुष्ठानमिति नहिविधिरिवकामोप्युपादेयमेवानु
ष्ठापयति किन्तुपपत्तुद्देश्यमनुपादेयंवाविनाकाम्यमानेनैसि
ध्यतितत्सर्वविधिसत्कारित्तयानुष्ठापयति एवंविधिरागयो
र्विभागदर्शनात् यथासौवरोपीठसमुपविशेदितिविधौतथा
विधपीठभावेविधेर्नानुष्ठापयति रागस्तत्तथाविधंपीठमुत्पा
धापितत्रनिवेशयति एवमाचार्यकरणाकामनेवाध्ययनमाचा
र्यप्रेरणाच्चोदेनामारावकेननिर्वर्त्यमध्यापनसिद्धर्यामि
ति मेत्राध्ययनविधिरेवनित्याधिकारेणसाधिकारोध्ययनेप्र
वर्त्तयतीतिप्रतिपादयितुमध्यापनाविधिप्रयुक्तिंनिराकरोति

 तदयुक्तमित्यपर इत्ययमाशयः नतावदाचार्यत्वं स्वयमेव विधे 
 यमिति युक्तं उपनयनाध्यापनभावार्थविषयत्वाद्विधेर्न्नापि 
विधिपदाभिधेयत्तया विधित्वमाचार्यत्वं प्राप्तमनेयत्वमात्रा
भिधेयत्वात्त्रापि नैयोगिकफलमाचार्यत्वंमात्याराद्ग्राह्य
तीति हेतु कर्तृत्वानिबंधनस्याचार्यत्वस्य लौकिकत्वाद्प्यमा
णावकविषयनयनपर्यंजन्यमाचार्यत्वमलौकिकमिति न
तत्रपस्मात्स्मत्राचार्यवृत्तिस्मृतौमाणवकसंस्कारप्रतिहेतुकर्तृ
त्वस्यैवलौकिकस्याचार्यप्रादुर्निमित्तत्वावगमात् स्तहपाटि
ना नांचसंमानतादीनां लौकिकत्वादाचार्यत्वस्यालौकिक
त्वेपुपनयननियोगफलत्वाविष्यतिततेनाध्यापनविधेः कृतःसा
धिकारतात्रयत्नमध्यापयीतेत्येकप्रयोगत्वावगमादुपनीया
ध्यापयीतेति विधिः परिणाम्यत इति तथाप्यगफलस्यापूर्व
यादस्यप्रधानाविध्याधिकारानिमित्ततां कल्पनीयाग्राच्चार्यकारणा
कामोमाणावकमुपनीयाध्यापयेदिति तदेवमध्ययनविधेर

ष्युपनय प्रकरणं त्वाद्वाजसनेयिनां सर्वस्मृतिषु चोपनीतो ऽ
धीयीतेति प्रकरणं प्रमाणमनस्याधिकारत्वसिद्धेः स्वविधिप्रयु
क्तमेवाध्यापनमितियुक्तं यत्तु माणवकस्य ऽक्तं तन्नयमे
वचामूलकत्वत्यनुमानेन वानाचार्यकरणकामस्य किंचि ऽ
द्विदधातीति किंतु पष्ठद्योपवं धाद्रुपनयनागैवादेनकर्तृराचा ध्यापना
र्यसंज्ञामेव विदधाति मानाचार्य प्रवदतेन इति वचनात्संज्ञा
याश्च वदमाणवन नमस्कारपूजादिविधानांगत्वात्तस्मादा
चार्यकरणविधिप्रयुक्तिरयुक्तेति नन्वेवमप्युभयत्राप्य
धिकारकल्पनानयुक्तमन्यतरे गौवान्यतरस्य प्रयुक्तिसि
द्धेः अतः कस्यान्यतरस्य कल्पनेति वीद्वायां माणवकस्य
प्रवृत्त्वात्स्वाधिकारं प्राप्तिपद्यातुमशक्तत्वादध्याप
नविधेरेव स्वाधिकारोपपत्तं प्रयुक्त इति चोदयन्निकल्पयामि
ति तत्रोत्तरमाह स्ववर्णज्ञा लराणामुपनयीत्तोतिपघपमाचार्य
स्यानियोग इति मा चार्यकरणकामस्य नियोग इत्यर्थो यमभि·

विवरण संधिराचार्यकरणा विधिस्तावन्नाविहित्त मध्ययनं प्रयुंक्तेऽध्य ट॰ पा॰
१२ यनान्नाधिकारिणाम प्रयोजनन्मून्यतया चार्यगुणाभावेन २
प्रवृत्त्ययोगादध्यो विहितमेवाध्ययनं प्रयोजयतीति तत्र वक्तव्यं
किंविधिः स्वरूपतिरायोपाधित्वे नाधिकारिणां विषमंचापेक्षत्वेन
वेति स्वरूपोपाधितया विषयमपेक्षतेता धिकारिणां प्रवर्त्तक
त्वोपाधित्वोदधिकारिणा इति चेन्न तस्य स्यापं विधिरिति विहि
तस्याध्येतृ विशेषस्य परिज्ञानाभावं कांचिद ध्यायपेत्तदमदा
ह माणवकोनानियुक्तोभवतीति अपरूपोपाधित्वेनैवाधि
कारिणामपेक्षनेविधिस्तर्हि सिद्धमध्ययनं सिद्धः साधिकार विधेः=
त्व तत्र प्रकरणा दुपनीतो धिकारी संपद्यते साधिकारित्वे चाध्य
यनाविधेः प्रयोजापित्वमपि सिध्यति परप्रयुक्तानुष्ठानसंभ
वे साधिकारो विधिर्न प्रयोजयतीति चेत्तत्त्वा णानियुक्तस्य च
त्वाध्याया ध्ययनइति अनियुक्तस्येति स्वाधिकारविधिनैवाप्र
वर्त्तितस्येत्यर्थः तत्त्वेकास्मिन्नप्रवर्त्तमानेऽप्यन्यः प्रवर्त्तिष्यतइ

त्रिस्त्रोत्तारूपेणाध्यापनस्यासिद्धिरिति नोपनेतृत्वस्यापित्तदं
गत्वात्स्वात्मनैवोपनीतमध्यापयेद् नान्यैनीतमन्यथाग
वैकल्यात्तस्याधिकारानिष्पत्तेः आचार्यत्वफलासिद्धेः तर्हि
न्यालोपिडुपनीयाध्यापयेत् न तत्र सर्वेऽमाणवकानप्रवर्त्त
नेति ब्राह्मयोजनव्यापार इति ना आपनमिति तद्बाल
कस्यकपत्स्वाधिकारप्राप्तिपत्तिः संध्योपासनसमिदाहरणादि
कर्त्तव्यताप्राप्तिपत्तिवदुपदेशमात्रमध्यापनकर्त्तव्यताप्राप्ति
पत्तिरिति नाविशेषः किंचानित्येन चाध्यापनविधिनानित्यस्या
ध्ययनस्यानुष्ठाने तदुपक्रमे नित्यमध्ययनं संपादयितुं न शक्य
तइत्याह किंचान्यदाचार्यकरणविधिरिति उपनयनाख्यः काम्य
मानमाचार्यत्वं तत्तावत्स्वयमेव पुरुषार्थः परंपरया च सुख
दुःखप्राप्तिनिवृत्त्योरेवपुरुषार्थत्वात् न चाचार्यत्वस्याध्याप
नमात्रस्य चाप्रयोजनाकांक्षायां दृष्टे सत्यदृष्टकल्पनानुपप
त्ते ३ अर्जनोपायत्वेन चवसां तु कर्मणामस्यान्वीणाकर्मा

विवरण त्ति जीविका याजनाध्यापनैश्चैव विशुद्धात्प्रतिग्रहश्चेत्ति स्म द्वि०पा०
२३ रणात् माणवकस्याध्ययनांगत्वेन गुरुदक्षिणादिविधाना २
त्तदंगत्वाध्ययनेनुष्ठायकस्याध्यापनविधेर्दक्षिणाद्यु-
पायांगेषु तदुत्पादकत्वाद् द्रव्यार्जनमेव प्रयोजनं तत्प्रयो
जनवत्तया काम्यत्वान्न नित्यवत्तु प्रयोगकृत्वसिद्धिरिति
उपगमनाध्यापने नास्ति नित्यत्वं नित्याह उपनयनाख्यस्तु
संस्कारो नित्य इति ननु प्रायश्चित्तस्याप्यकरणे दोषः श्रू
यते ज्ञातौ चिरकालं द्विगुणां व्रतमर्हतीति नैवं काम्यप्रत
तृ०उ वायश्रवणात् उपनयनस्यानित्यता उच्यते न प्रायश्चित्ताक
मि रणनिमित्तदोषनिरासाय द्विगुणां व्रतमुच्यते किंतु प्रायश्चि
त्तेनानिराकर्तव्यस्य पूर्वदोषस्यैवातिमात्रचिरकाले द्वि
गुणव्रतापेक्षत्वपैव निरास इत्युच्यते अन्यथा प्रायश्चित्ता
नवस्थाप्रसंगात् ननूपनयनसंस्कारस्यानित्यत्वेप्य
ध्ययनस्य काम्यानित्यत्वसिद्धिरिति नत्वात्संस्कारस्येति

त्रं गुणपाधिविहितत्वादंगस्योपहितांगनित्यत्वात्स्वोपाध्ये
र ध्ययनस्यापि नित्यत्वं कल्पयतीति ननु अध्ययनमनारभ्या
७ धीयमानस्योपनयनं कथमध्ययनांगं स्यात् नचोपनयन
संस्कारविधिमात्रमेवानुपपत्त्याशेषित्वेनाध्ययनं कल्प
यति प्रकृत्यादिविशेषसंबंधानामपि न प्रमाणाभावेऽध्यय
नाविशेषेणासंबंधसिद्धेः यथाहि स्नायभार्यामिति विधिः
प्रतीतिरितो हि स्नायः संस्कारार्थी पि प्रकृत्यादिविशेषसंबंध
प्रमाणाभावात्संस्कार्यो हि स्नायपदार्थसामर्थ्यात्क्रतुसं
बंधेऽविशेषात् सर्वक्रतुसंबंधप्रसंगात् एकस्य संस्कार
स्य सर्वक्रतूपकारित्वानुपपत्तेः श्रौतान्यगत्यामनभ्युवात्
संस्कारकर्मत्वं परित्यज्याभ्युदयफलः स्वतंत्रो विधिर
भ्युपगतः एवमुपनयनविधावपि श्रुत्यादिप्रमाणाविरहा
त् संस्कार्यमाणवकसामर्थ्यात्क्रतुसंबंधे सर्वक्रतुसं
बंधप्रसंगात् अन्यागत्यामनभ्युवाना संस्कारकर्मत्वपरित्य

विवरण ज्यत्वं तत्र एवाभ्युदयफलः स्यात्कर्मस्वरूपविधिर्हि सर्वस्वभा त०पा०
२८ वसामर्थ्यादेवांगांगिभावं सामान्येन प्रतिमिमाणः अत्त्यादि २
स्वरूपस्तत्र एव विशेषसंबंधं प्रतिमिमीते न ह्यनियोपनयनस्य संस्का
रकर्मता सिध्यतीति अत्रोच्यते ध्ययनविधिरेव अक्रत्यादि 14
प्रमाणानपेक्षया चार्थिकेन प्रमाणेनोपनयनमात्मीयां
गत्वेन स्वीकरोतीत्याचार्याधीतो वेदमधीयीतेत्यादिनियमशा वि
न्नालिखितपाठादिप्राप्तिनिषेधेत्याचार्योपगमनमंतरेण
माणवकस्याध्ययननिर्वृत्त्ययोगात् ननु दृष्टमप्याचार्यो
पगमनमध्ययनविधिसामर्थ्यादुपादीयतां नाम दृष्टस्तूपन
यनसंस्कारः कथमंगतयोपादीयत इत्युच्यते अत्राचार्योप
गमनविधिरेव नानाविधेतिकर्तव्यकलापानुगृहीतो दृ
ष्टसंस्कारमुत्पादयति स च विधिर्विधिप्रयुक्तप्रयोजनमी
दप्रमाणाद्दृष्टोपगमनं ह्येतदध्ययनविध्युपकारं संभवति
नैवादृष्टं कल्पयति दृष्टे सत्यदृष्टकल्पनानुपपत्तेः दृष्ट
फलातिशये दृष्टे संभवति स्वतंत्रादृष्टकल्पनानुपपत्तेरि

त्यर्थः तदेवमध्ययनविधिसामर्थ्यादुपादीयमाने सत्याचार्योप
गमने तदाश्रितोपनयनविधिजन्यसंस्कारस्यापि तद्वारेणाऽ
ध्ययनविधिसंबंधस्योपनयनविधिसामर्थ्यादेवासिद्धेरुभ
यविध्युपादानसामर्थ्यादध्ययनांगमुपनयनमिति सिद्धं न
नूपनयनस्य संस्कारकर्मत्वान्नायां सिद्धायां संस्कारविधेः प्रयोज
नाकांक्षायां तन्निष्ठाध्ययनविध्यादिनाऽऽचार्योपगमनदृष्टद्वार ग
णोपनयनविधिरध्ययनांगत्वं मानमतः सामर्थ्यात्क्रामिमीमी
ते तच्चोपनयनस्य संस्कारकर्मत्वे प्रमाणाभावमित्यत्रोच्यते प
रस्परोपादानसामर्थ्यादेवोपनयनाध्ययनयोरंगांगिभा
वे सिद्धे किमुपनयनं प्रोक्षणादिवत्संस्कारकर्मतयांगं किंवा
प्रयाजादिवत्स्वाध्ययनफलोपकार्यंगमिति विशये संस्कारक
तयांगत्वमुपपादीयते अंगिस्वरूपोपकारित्वालाभात्संनिपत्यां
गत्वात्फलोपकार्यंगानां विप्रकृष्टतयांगत्वात्सविप्रकर्षात्सं
निकर्षग्रहणस्य-युक्तत्वादतो माणवकसंस्कारत्तयोपनयन
मम ध्ययनस्वरूपोपकार्यंगमुभयविध्युपादानसामर्थ्यात्सि

किंचाष्टवर्षो ब्राह्मण उपगच्छेत्स्तो धीयीतेति वाक्य विपरि ऋ॰पा॰ ३
२५ णामस्य वदयमाणमात्तप्रवृद्धकृत्तिरेवोपनयनसंस्कृतं माण
वकमाद्याय स्वाध्यायाध्ययने विनियुक्ते इति श्रुत्यनुगृही
त एवोपनयनविधिरध्ययनांगत्वात्मनः प्रतिपादय
तीति छांदनसंस्कारो न परार्थस्तत्पत्ते किंतु माणवक एवेति
न युक्तं वक्तुं अनंतर अह तत्वात्संस्कारस्योपनयाध्ययन
योः परस्पर सांकांक्षत्वस्य दर्शितत्वादाकांक्षितसमर्प
णत्वाच्च श्रुतेरविभक्तेरपि प्रातिपदिकस्यान्वितत्वाभिधायित
या संबंध प्रतिपादकत्वात्तस्मात्तच्छ्रुत्यनुगृहीत एव विधिरं
गांगिभावं प्रतिपद्यते इति किंच वाजसनेयिनां सर्वस्वत्यन्त
मिति श्रुतिश्चोपनयनं प्रकृत्याध्ययनविधानात्फलवदध्य
यनप्रकरणानुगृहीत एवोपनयनविधिरध्ययनांगत्वामात्म
नः प्रतिपादयतीति तस्माच्छोक्तसंस्कारस्य स्वाध्यायाध्ययनार्थ
इति तदकाम्यत्वेऽपि मात्राचार्यकरणविधिर्नित्यसमीहितफ

लत्वान्नित्यएव तत्त्वमनानित्यानित्यसंयोगाविरोध इति चो
दयन्ति ननु कथमाचार्यकिरणे इत्यादिना फलस्यनित्यस
माहितत्वमंगीकृत्यपरिहरन्ति भवेदेवं नित्यत्वाफलवशे
नन शाब्दादिति मन्तु फलसामर्थ्यच्छाशाद्द सामर्थ्याद्वा तु
ष्टेयं नित्यकर्त्तव्यं चेत् एकिंप्रमाणान्त विशेषणाविनाकिं हीय
तेइति तत्राहत्तयाहि फलस्यानित्यसमीहितत्वादितिवास्तवी
वस्तु फलसामर्थ्यानिवंधनेत्यर्थः ननु ध्यापनेक्वचित्फलसा
धनकामनाधीनाकर्त्तव्यता प्रतिपत्तिः अन्यत्र तु शाब्दक
र्त्तव्यता प्रतिपत्त्यधीना ध्यापने फलसाधनेच्छा किमत्रा
ध्यापनस्यानित्यकर्त्तव्यता प्रतिपत्तेराचार्ये मितितत्राह परा
र्थ्याहिनित्यकर्त्तव्यता प्रतिपत्तावितिआस्त्यत्रविशेषः
कथं अध्यापनविधिर्हि शाब्दान्नित्यतयाप्रतिपन्नोविशेष
णास्वाधिकारोपाधौ सर्वदा सर्वान्प्रत्यनुक्षेपेच्छामुत्पादयन्प्रव
र्त्तयति प्रामाणिककर्त्तव्यताप्रतिपत्तेः स्वोपाधौ संकोचाभा

विवरण वादिच्छाधीनेन कर्त्तव्यत्वावगमेन संकोचाद्देवकर्त्तव्यत्वावगम नौ०प०
२६ संकोचात्रनित्यवदध्यापनसिद्धिरिति ननुप्रामाणिकानित्य २
कर्त्तव्यताधीनापीच्छाकृतिहेतुः शोकालोकत्त्वनिचकास्कत्ताम
र्थ्याभावाद्विशेषो नैतावतात्रानिरुह्यते तत्र कथं नित्यकर्त्तव्य
ताधीन॰ नित्येच्छाद्वारणानित्यवदनुष्ठानमिति तत्राह अवि
त्यादिभावेपीति प्रमाणान्तरावन्नित्यो ध्यापनविधिः प्रत्य
वायभयादेवयावच्छक्यामि कृदिच्छारत्नाधिकारिणानुष्ठाय
पत्तीत्यर्थः नैने त्रिस्यष्टार्थः ननुप्रमाणान्तरोविधिनित्यत्व
वदिच्छात्तोपिकर्त्तव्यतानित्यत्वं किं न स्यादिति तेन्याह फल
लवधानुकर्त्तव्यताप्रतिपत्ताविति अन्नानित्यैवसात्त्यादिरू
त्यध्याहारः ननु वर्षस्यनित्यसमाहितत्वात्कर्त्तव्यताप्रति
पत्तिनिमित्तकामोपिनित्य एवेत्यत आह यद्यपीति उपपत्ति
त्यन्वेष्णुपायभेदाद्ध्यापनकर्त्तव्यताप्यनित्यैवेत्यर्थः
ननुकस्यचिदुपाधानराससमर्थस्य तद्दकोपायत्वान्नित्यकर्त्त

यत्वेति तत्राह तदेकोपाधित्वेपीति क्रत्वोर्नित्यानित्यसंयोगवि
रोध इति इदानीं स्वत्वेनानित्यत्वाभावेपि नित्यपुत्रोत्पादनविधि
शेषत्वयोपनयनाध्यापनयोर्नित्यत्वान्न नित्यानित्यसंयो
गविरोध इति चोदयति ननु पितुः पुत्रोत्पादनविधिरिति
३७ तत्पुत्रोत्पादनविधेः पितॄणां परलोकगतानामस्मिंल्लोके पिंड
पितृयज्ञाद्यनुष्ठानद्वारेणान्नादिसंपादनं प्रयोजनं न चोपनय
नाध्यापनार्थज्ञानादिव्यतिरेकेणानुष्ठानं संभवतीति नन्वत्र
नित्यस्य पुत्रोत्पादनविधेः फलपर्यन्ततापेक्षितमनुशासनं
न शेषवत्तया विद— धीति तस्मात्पुत्रमिति वाक्येन तत्र पितुरे
वानित्यपुत्रोत्पादनविधिसामर्थ्यादुपनयनाध्यापनादिवि
धीनां नित्यत्वं प्राप्तं तत्रार्थज्ञानपर्यन्तत्वादनुशासनस्या
ध्यापनमप्यर्थज्ञानफलमिति प्राह कथं चाध्ययनस्येति परि
हरति उच्यते नानेन पुत्रानुशासनं विधीयत इति अप्याप्ततः सं
प्रति यदा प्रैष्यन्मन्यतेथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति

विवरण वेदत्तदर्थ्येनत्पकलानांस्वानुष्ठेयानांपुत्रे समर्प्यमाणानांसंपुत्रः २०पा

१२ प्रत्याहाहंब्रह्माहंयज्ञोहं लोकश्चेति पुत्रेणानुष्ठेयतयास्वीक २

रणसंप्रत्तिकर्मत्वं च पूर्वोक्तशासनमन्तरेणाकस्मादेवसक

2 लकर्त्तव्यसंग्रहानुपपत्तेः फलपर्यन्तपुत्रोत्पादनविधिनाक्षिप्त

मनुशासनंपूर्वनिर्दिष्टमेवार्थवादतयानुवदत्येनवाक्यमि

तिभावः माभूदेतद्वाक्यमनुशासनविधायकंतथापिनि

त्यपुत्रोत्पादनविधिसामर्थ्यादेवापितुरुपनयनानुशा

सनविधिर्निर्णयएवप्राप्तइतिनत्रोहगर्भाष्टवर्षेत्यादि

ना क्रयमर्थः नित्यपुत्रोत्पादनविध्याधिकारिणःपितुरा

पुर्नियमाभावादनुशासनपर्यन्तमवस्थानानुपपत्तेः कर्त्तव्यार्थो

पदेशनमेवानुशासनंनानुष्ठापनमतोनित्यपुत्रोत्पादनविध्या

क्षिप्ततयापितापनयनादिविधेर्नित्यत्वे नन्वपितुःकर्त्तव्योप त्रि

देशनमेवानुशासनंतोपनयनाद्यनुष्ठापनमितिकथमवग

म्यतेतत्राहतथाचलिंगमप्येतत्कोनुरिति ननुस्वानित्यानित्यसं

योगाविरोधस्तदवस्थ एवेत्याह तदेवमनित्यत्वेनेति ननुमाणा
वक एकैकस्मिन्नाचार्ये मरणादिना निवृत्ते पुनराचार्यान्तरमा
श्रयति स्वमध्ययनं संपादयिष्यतीति नेत्याह किंचाचार्यप्रे
त इति न तावन्माणवकः स्वनियोगेनैव प्रेर्यसमर्थाः स्वाधिका
रं निर्वर्त्तयितुं आचार्यान्तरं संपादयति अनंगीकरणात् तत्का
र्याचार्यादियोगेन अधिकारिशोभावे नियोगस्य कर्त्तव्य
ताप्रतिपत्त्यभावात्कर्त्तव्यानुष्ठानाय साधनं संपादयतीयोगादि
ति ननु साधनान्तरप्राप्तिनिष्पादनवदधिकारिणोपि प्राप्ति
निष्पादनेन कर्त्तव्यं माणवकः संपादयेदिति नेत्याह तद
धिकारिप्राप्तिर्न धीयत इति अवश्यकर्त्तव्यस्यत्यननुष्ठाने
प्रत्यवायापत्तेरनुष्ठानापादकस्याभावे प्राप्तिनिधिरादीयते
अधिकारिभावे ममेदं कर्त्तव्यमिति संबंधानवगमात्त्वकर्त्त
येति योगेऽवश्यमनुष्ठानाय प्राप्तिनिधिरादीयते तेन ता
वन्मात्रस्य तस्याविधिसंबंधनिमित्तनिवृत्तेः कर्त्तव्यताभ्युपाता

विवर० विप्रतिनिषेधेनाचार्यस्येदं कर्त्तव्यं तस्य कर्त्तव्यत्वसिद्धकृत्त र०पा०
२८ स्कालत्वात्तस्मान्नाधिकारिणः प्रतिविधिसंबंधः नन्वर्हि ३
सर्वत्र प्रतिनिधिवार्त्तावकाशात्तत्राह अधिकारी स्वाधिका
18 रासिद्धय्यर्थमिति तथाचार्यप्रेतेनान्यः कश्चिदाचार्यः स्वाधि
कारनिर्वर्त्तयितुं माणवकं स्वीकरिष्यति किं माणवकस्या
चार्यान्तरकरणाव्यापारेणेति न कृतरूपनयनात्वात्तनुप भा
नेत्रयोगस्याचार्यव्यापारस्याभावेऽध्यापनं निर्वृत्त्ययो
गात् माणवकान्तरे गां निर्वृत्तामिति चेत् नैवैकाध्यापना
स्यापि सिद्धेर्माणवकान्तरस्वीकारो नुपनीतं चाध्यापयी
तांगस्य निर्वृत्तत्वात् वृत्त्यपचयार्थैः संग्रह इति चेत् ह्री
ह्रस्वमाणवकस्यासंग्रहप्रसंगः अत्यव्यवहितग्रामवासिनं
च माणवकानामाचार्यसंपादनार्थं ग्रामांतरगमनं तस्यात्
नहि न वृत्तत्राध्यायायेतारः श्रोत्रियम्बहृष्यन्ते तथ्याच
माणवकस्योपनयनादिसिद्ध्यर्थ्यैस्वयमेवाचार्यगमनं प्र

स्या

यत्र सत्यकामोह वैजाबालो ब्रह्मचर्यं भगवति वत्स्याम्युपेयां भग
वन्तमित्यादिश्रुतौ उपसंहरति एवमेषामवकुदोषेति नन्वत्र
विधिप्रयुक्तत्वे सति उपगमनाध्ययनयोस्तत्प्रयुक्तत्वयोपन
यनाध्यापनसिद्धेः तत्रविधानमनर्थकमिति नायं प्रयोजक
व्यापारयोर्विधिः किन्तूपगमनाध्ययनयोः कर्तृव्यापारयो
र्विधिरित्याह तस्मान्माणवकस्यैष नियोगइति नन्वशि
जर्थसंस्पृष्टस्यार्थ्याभिधायिनि विधिपदे कर्तृव्यापारे विधि
त्वे स्वर्गोवाक्यप्रमाणाविरुद्ध इति चोदयति कथं गुणकर्तृव्या
पारसंबन्ध इति किंन्यायाविरोध उच्यते किंवाप्राप्तविरोधः
नतावत्स्पष्टविरोधोऽन्यत्रापिदर्शनादित्याह यथैतयाग्राम
कामंइति नापिन्यायविरोधः प्राप्तानुवादेनाप्राप्तविधानादि
त्याह ग्रामकामस्य यागोविधीयतइत्यादिना नन्वध्यापन
याजनयोः कर्तृप्रयोजकव्यापारद्वयाबगमादन्यतरस्यानुवा
देनान्यतरोविधीयतइति युक्तं उपनयनेतु धात्वर्थस्य प्रयो

जकव्यापारत्वात् अनभिधीयमानः कर्त्तृव्यापारः कथं विधीयत इति
चोदयन्ति युक्तं याजयेदित्यादिना नन्वुपनयनेमाणवक
व्यापारविधिरध्यापने न भविष्यति नेत्तद्वाक्यसारूप्यादित्या
शङ्कय एवमाचार्यकरणविधिप्रयुक्तत्वादिति नन्वप्रयोजकव्या
पाराभिधायितामपि नयन्ति धातुनामाणवकव्यापारस्य अनभि
धीयमानस्यापि गम्यमानत्वात् स एव धातुनालक्षणयोपादा
य विधीयते न प्रयोजकव्यापारः स्वयं प्राप्तेरिति परिहरन्ति उच्य
ते माणवकस्यैव वायमिति ननु माणवकव्यापारो गम्यमानत
या वाक्यार्थे प्रतीयते कथं वा प्रयोजकव्यापारः प्राप्तानुवाद इ
ति चोदयन्ति कथं यजत्ववदिति माणवकव्यापारस्य गम्यमान
तामुपपादयितुं प्रथममाचार्यव्यापारस्याविधेयत्वामुपपाद
यन्ति उपनयीतेत्यस्याभिधानतो त्यायत इतिमाणवकमुप
नयीतेत्युक्ते माणवकस्य स्वात्मसमीपागमनमभिधानतः प्र
तीयते न स्वस्य माणवकसमीपगमनमन्यथा माणवकमुपगच्छे

दितिवचनं स्यात् न्यायतश्चप्रतीयते यथा वालान् दन्ताशिगाशि
द्वीपलौकिकः पुरुषो न बालगुणाभावं गच्छति किन्तु वालानेव
स्वयमात्मगुणाभावं नयति नन्वेवमाचार्यव्यापारो न प्राप्त
उवादः कथं मुमुक्षुधर्मस्तु हि ते ध्यायने माणवकस्य विहित
स्वाविधिप्रयुक्ते चाध्यापने कृत्यर्थेनतया चार्यप्रवृत्तिः प्राप्तानि
वृत्त्यर्थे प्रवृत्तौ च प्राप्तायां तदनुवादेन माणवकव्यापारे ध्य
यनादिर्विधातुं शक्यते इति इतरेतराश्रयप्रसंगात् नन्वकौ
मं पाजयेदित्यत्रापि समानो यं दोषः अत्राप्यस्वाविधिप्रयुक्ते
भूयागं तत्र कुसामान्येन वृत्त्यर्थे तयाप्राप्तं प्रयोजकव्यापार
मनूद्य ग्रामकामस्य यागविशेषो विधीयत इति नन्विति हि तत्रापि
विधेतरकुसामान्यप्राप्तप्रयोजकव्यापारानुवादेन माणव
कव्यापार उपगमनाध्ययनादिर्विधीयतां अत्रैप्यवा माणवक
व्यापारविधिसामर्थ्यादेव प्रयोजकव्यापारः प्राप्यत इतिन प्रयोज
कव्यापारविधानेन माणवकव्यापारः प्राप्यत इत्युक्तं तत्रमा॰

विवर० णावकव्यापारविधानादेकभाविनीं प्राप्तिमनूद्य माणवकव्या र० पा०
२० पारः कदाचिदप्यप्राप्तो विधीयत इति नेदं तदाह एतच्च सर्वमु ३
त्पत्त्यर्थत्वेन ब्राह्मणस्यान्यत एव प्राप्तमिति ननु प्रयोजकव्या
40 पारं प्राप्तमेवानूद्य गुणस्याधिकारादिविशेषविधिपरं वाक्यं किं
न स्यादिति नित्यवदधिकारविधिपरं वाक्यं जीवनादिनित्या
काम्याधिकारयोरश्रवणात् अतोऽगुणविधिरेव दध्नाजु
होतीत्यादिवत्परिशिष्यत इत्याह नन्वकर्म ध्यापयेदिति
भवतु नाहि गुणविधिरिति नेत्याह नन्वप्राप्ते व्यापार इति अप्रा
८ यमाशयः यावद्विशेष्यापि पदार्थः प्रमीयते तद्धा नानाविध
गुणविधित्वे तथा सत्येकोऽविशिष्टः पदार्थः प्रमीयत इति
न वाक्यभेदः स्यात् यदाऽविशेष्यमनूद्य विशेषणानि प्र
तीयन्ते तदा विशेषणानामन्योन्यावांविशिष्टत्वे एकत्वाप
त्यभावादन्योन्यानपेक्षतया प्रत्येकं प्रमेयत्वे प्रमेयभेदा
द्वाक्यभेद इति ननु सर्वत्र विशेष्यसामानाधिकरण्यानुवा

ब=

घमेवा सत्यं विशेषणान्यपि तथा किंतु विशेषाकारेणान्योन्य-
विशिष्टतया पदार्थाः प्रमीयन्त इति तस्मान्नूडुपपत्त्यधिकारस्तु-
ण्णाविधयः प्रयोजकव्यापारेनक्स भवंति उपसंहरन्ति अग्नीता
चार्यस्येति न त्वमाणवकव्यापारस्य गम्यमानस्यैव धात्वनाल
ब्धत्वात्योपादायविधेयत्वं दर्शयितुं चोदयन्ति न नु माणवकस्य
पीति परिहरन्ति अग्नीति तूमहत्यादिना ननु कर्तुरेव व्यापारो गम
नादिरुक्तः प्रयते न कर्मकारकस्य ग्रामादेः माणवकस्य तत्पत्य
र्थकर्मत्वेनतः कथं गम्यमानव्यापार इति चोदयन्ति कथमि
ति परिहरन्ति यदेवोपनयतीत्येति उपनयनसंस्कारयोपि त्युप
गन्तापोन्यर्थः नयत्यर्थकर्मणो नीयमानस्य गमनव्यापा
रः सुप्रसिद्ध इति भावः ननु तर्हि माणवकस्य गमनं प्रयो
कव्यापाराद्वा स्वत एव तिष्ठति किं मानं तत्र हि धीयत इति नविधा-
नमंतरेणासौ ऋद्धिरित्याह तस्य च प्रेक्षावत्त्वादिति ननु विधाने
पिकाम्यविधिः स्यादित्यतिनेत्याह विधमानस्यापीति कथं

विवर० तर्हि विधिरिति परिशेषान्नित्यविधिरित्याह विधित्वेनोपस्थक तृ०पा०
२१ र्त्तव्यत्वानामिति कथं तर्हि वाक्यं परिणाम्यत इति न दाहृतेनाष्ट २
वर्षं ब्राह्मणानामिति ननु नित्यतया विधेयत्वेपि विधिस्वरूप
2/ संबंधो वा विधिस्वरूपसंबंधनिमित्तं वा प्रवृत्तिर्वाधिकारशब्दा
र्थो न लभ्यत इति चोदयति नन्वेवमप्यधिकारो न लभ्यत इति
श्रूयमाणत्वाभावादनुसारमात्रेण गम्यमानस्यापगंतुरष्टवर्षब्रा
ह्मणानामिति विशेषणाश्रवणादिदमेवाधिकारनिमित्तं संपद्य
ते नैवमेकैकस्य विशेषणस्याधिकारनिमित्तत्वानुपपत्ते
र्विशेषणयोश्च परस्परविशिष्टताऽभावात् एकैकस्य विशेष
णस्याभिधानिके क्रियासंबंधेप्यनुपाये कहायन्यादिवदर्था
त्परस्परविशिष्टतयाधिकारनिमित्ततेति चेन्न विधिस्वरूपस
संबंधनिमित्तस्याशाधूस प्रसंगादिति परिहरन्नुपसत्तप्रवाधि
कारहेतुं नित्यनिमित्तमिति विधिस्वरूपसंबंधपदं पूर्वाहिनेरि प्रवृत्ते
त्यर्थः नित्यमिति जीवतः पुरुषविशेषस्यानियतभावित्यर्थः

ति

नच शाद्रुमेव सर्वत्राधिकारनिमित्तं सांगकर्मानुष्ठानसामर्थ्य
स्याप्य शाद्रूस्याधिकारं भावाच्छूद्रस्याधिकारादिति अथ
वात्रियासंबंधाभिधानमुखेन विशिष्टसमर्प्यको शाद्रूद्रयत्ना
र्थपर्यकल्पनादधिकारनिमित्तस्य शाद्रुत्वं नावहन्यते ए
वमपिविशिष्टस्यनाधिकारनिमित्ततेति चोदयति ननु
जातिवयसी विशेषणामुपादेयस्येति अयमभिसंधिः पाद
येनाम साक्षाद्वा परंपरया वा विधिविषयत्तया नुष्ठेयं तद्विशे
षणं च क्रियाकारकत्तत्कुणासमुदाय ऋत्विगर्थः तत्रोपादेय
विशेषणानि दंडीप्रैषानन्वाह लोहितोष्णीषा ऋत्विजः प्र
चरंतीति कर्तृविशेषणानि व्रीहिभिर्यजेतेत्यादौ वत्तृत्वा
दीनि करणविशेषणानि दूयवन्वीरघ्न इत्यादीनि संप्रदान
विशेषणानि अनुपादेयविशेषणमधिकारसंबंधनिमित्त
मनुष्ठेयकारकविशेषणतया विधिं प्रतिभूतत्वात् अधिका
रिणस्तद्विधिप्रतिस्वामितया प्राधान्येनान्वयात् कर्षकतर

 

त्रमाणवकस्योपादेयत्वंगम्यते उच्यते प्रयोजकव्यापा
रं प्रतिमाणवकस्य कर्मत्वाभिधायित्वी द्वितीया विभक्तिः स्वव्या
पारं प्रतिकर्तृत्वं गमयति कर्तृविषयत्वात्प्रयोजकव्यापार
स्य तत्र प्राप्त प्रयोजकव्यापारानुवादेन कर्तृव्यापारे विधिः संबं
धमात्रं परिशाम्यतीति शब्दप्राप्तं माणवकस्य कर्तृत्वं पराहृत्य
त्युपादेयमाणवकविशेषणस्य जातिविशिष्टवसन्तोनाधि
कारनिमित्तत्वेति कस्य तर्हि अधिकारनिमित्तत्वमित्यत आह अनु
पादेयविशेषणानामधिकारहेतुरिति विधिप्रयुक्तानुष्ठेयत्वादि
शेषणाव्यतिरेकेणासंबं धानुपादेयो यथा जीवन् एह हौत्वा
न्स्वर्गकाम इत्युपात्तत्वेन परिच्छिन्ननियोगपदमंगीकरोति
सम्यमस्तीयं स्थितिरिति अयं भावः यत्र लिङादिपदेन नियो
गो वाक्यार्थतया प्रतिपाद्यते तत्र वाक्यार्थभूतनियोगाकांक्षा
या धिकारित्वेन संबध्यते ममायं नियोग इति स्वामित्वयात्व
यित्वं नियोगस्य मधिकारित्वं नाम तत्र प्रथमं ममायं नियोग

विशिष्टत्वात्मच्छ थेतिर संबंधाकांक्षियोगस्य स्वकस्य
स्मितिविशिष्टयोपाधियुक्तत्वाधिकारविशेषता
वैदत्वात्विशिष्टकामाधिकारित्वेण ५ पं० १३

इतिप्रतिपद्यतिनियोगस्यकार्यत्वावगमात् तदनुष्ठानाय धात्वर्थविषये
यत्नात्कर्तृत्वेनान्वयेति नियोगोहिसाध्यत्वयाऽवगम्यमानः प्रथमा
न्वयिनोधिकारिणोममायंनियोग इति प्रतिपद्यते नियोगानिर्वृत्ति
समर्थे धात्वर्थेकर्त्रन्वयमन्तरेणानुपपद्यमानस्तदन्वयमर्थापत्
त्या प्रतिपादयतीत्यधिकारान्वयपुरःसरः कर्तृत्वान्वय इतिप्रा
भाकरा मन्यन्ते तत्त्रभवत्वनुपादेयविशेषणामधिकारहेतुर्भा
वनावाहेतुरुक्तपादेयविशेषणामधिकारहेतुरित्याह किंतु
कर्तुरधिकार इत्यपि स्थिता न्यायविद इति [illegible] ऽयमाशयः लिङा
दिप्रत्ययैर्यदा पुरुषप्रवृत्तिर्भावनावाक्यार्थत्वया प्रतिपाद्यते
तदाप्रधानकोद्देशानिमित्तत्वात्संबंधस्यक्रियायां स्वरूपो
पाधित्वेनकर्तृकरणकर्मापेक्षणीयत्वात् पुरुषार्थधात्व
र्थयोरभावयितृत्वकरणत्वेनान्वयात् परिशेषात्स्वर्गकामादे
यः कर्तृत्वेनान्वीयते तत्रकर्तृविशेषणात्पात्तन्नियमा
र्थीनिजीवनगृहदाहकामनादीनित्रप्रथमंकर्तृत्वेनान्वयं

विवर० धात्रिपद्यकर्तुरेव फलसंबंधात्मदीयमिदं फलसाधनं कर्मेति कु न्२० पा०
२३ र्मस्वामित्वलक्षणमधिकारान्वयं पश्चादनुभवति कर्मफलभो ३
क्तृत्वमेव हि कर्मणा स्वाम्यन्वय इति न तस्य कर्तृविशेषणा
न्यवतस्यैव फलभोक्तृतया कर्मणा स्वाम्यन्वय नियमयंतीति
कर्तुरधिकारस्थितिः एवं भावनान्वयार्थोपादानेनापि मा
णवकस्याधिकारसिद्धिरिति भावः अथ यथा राजसूये
राजत्वं कर्तृविशेषणमन्यनाधिकारित्वाद्राजत्वस्य कर्तृवि
शेषणतया संपादयितुमशक्यत्वात् अधिकारिविशेष
णामपि संपाद्यत्वेन दरिद्रस्यापि स्यादिति ननु नायं परिहार उपप
द्यते श्रेयःसाधनस्य लिङादिप्रत्ययवाच्यार्थत्वेनाभिधीय
मानत्वात्तस्य च प्रथममधिकारान्वयापेक्षत्वात्कस्य श्रेयो हि
भोक्तारमपेक्षते ऽतस्तत्साधनमपि भोक्त्रन्वयि भवति कस्येदं
श्रेयःसाधनं ममेदमभिलषितसाधनमिति च स्वाम्यन्वयाकांक्षा
दर्शनात्तत्र कस्यायं नियोगो ममायमिति भावनान्तःक्रियाकर्त्रा

यत्र यावदग्रस्य मानान्तमपेक्षते नन्वकृतियोग्यमेवश्रेयःसाध
नं विधिः कर्तुरिष्टाभ्युपाय इत्यभ्युपगमात् न नश्रकृतिः
कर्त्रारमपेक्षते इति नाहि नियोगस्यापि कार्यतयावगमात्कृ
तिनिमित्तः कर्त्रन्वय एव स्यात् ननु कृतिर्नियोगोपसर्जनत
यैव शब्देनाभिधीयते न चोपसर्जनाकांक्षया पदार्थान्वयः
किं तु प्रधानाकांक्षया नन्व प्रधाननियोगाकांक्षया प्रथ
ममधिकारान्वय इति समानमेतत् दृष्टसाधनेपि कृतेरुपसर्जन
तयाभिधानात् नन्वश्रेयसोपि उपसर्जनत्वात्तत्सामर्थ्यल
भ्य भोक्त्रन्वयः कथं साधनस्य स्यात् नैष दोषः साधनत्वस्वरूपो
पाधित्वाच्छ्रेयसस्तस्य च नियमेन भोक्त्रन्वयात् कर्तृभोक्त्रोः साधि
करणस्य साधनस्य सोपाधिश्रेयोनुसारेण भोक्त्रन्वयानियमासि
द्धेः तस्मात्समाभिलषितसाधनमिति प्रथममधिकारान्वयो
वाक्यार्थभूतेनाविधिनाश्रेयःसाधनेनापेक्षते पश्चादभिल
षितसाधनत्वस्याश्रेय धात्वर्थविषये विधिसामर्थ्यादेव

 

२४

कर्तृत्वयं प्रतिपद्यत इति एवमपि तत्र न विरोध इत्याह किंचेह तत्
मारावको जानाति वयोविशिष्ट उपादेय इति यद्वेदोपनयनाध्य
यनादिमाराावकव्यापारे सामान्येनाभिलषितसाधनत्वलक्षा
राो विधिः शब्देन प्रतिपाद्यते तदा सामान्यस्य श्रेयो विशेषाकां
क्षायां परं परया पुरुषार्थसाधनमुपनयनसंस्कारं माराावकग
तश्रेयो विशेषं परिकल्प्य तत्साधनलक्षराो विधिर्माराावक
व्यापारे प्रतिपादितो भवति ततः संस्कारफलभोक्तृतया
विधौ माराावकः स्वामित्वेनान्वेति तच्च स्वामिनियमार्थत्वा
त्तराायादिविशेषराात्स्येव पश्चादभिलाषितसाधनत्वविषये
माराावकव्यापारे कर्तृत्वे पि नियमयतीति नियमप्यार्थः ननु प्रयोज
कव्यापारविषयतया कर्तृत्वेनैवान्वयो वाक्यान्न प्रतिपन्नः सत्य
ननु विधिरेवं धसाम पर्यालोक्य कर्तृत्वयं प्रतिपाद्यकर्तृत्वयतियमः
परिकल्प्यते नन्वेवमप्यध्ययनस्य न तत्साधिकारत्वासिद्धिरिति
तत्राह तदेवमुपनयनस्य पश्चाध्ययनार्थत्वादिति प्रसिद्धं च सर्वो

स्मृतिशास्त्रेषूपनयनमध्ययनं जैमिनिवाजसनेयिनां चो
पनयनं प्रकृत्याध्ययनं विधीयते विधिद्वयसामर्थ्याच्चोपाद
नप्रमाणं दर्शितं इह पितृमध्यापयीतेत्युपनीतेन च छंदेन व
रान्स्तपात्यंगानि गितोभ्ये काधिकारत्वाद्वपनीतो ब्राह्मणो धी
यतेति निसंपद्यते अंगाधिकारनिमित्तस्य कालस्य सर्वत्राणि
य न्यत्वयनिमित्तभावाद्वयस्तेनाध्ययनाधिकारनिमित्ततेति
नन्वधिकारोऽध्ययनविधिनार्थावबोधा
य नाभिमिनितेत्याह एवमदृष्टार्थत्वाभावात्रैवेति नन्वसकृदध्यय
नादेवानित्याध्ययनसिद्धेरावृत्तिः केन कल्प्यते ऽर्थावबोधफ
लपदेवाकर्ष्यं लभ्यते फलावसानानुपपत्तेरितिचेदिहापिस
मानमदृष्टार्थत्वात्तेः फलत्वान्नत्वदृष्टमेवाविधिफलमित्युक्तं दृ
ष्टमानमर्थावबोधफलेऽपि नन्वदृष्टसमवायिदृष्टं फलस्यवाव
रस्वीकरणाद्विचाराद्यपेक्षत्वात्तदर्थमावृत्तिसिद्धिरिति नधा
रणातदीपयोरुपेयवाक्येभ्योऽप्यस्वीकृतेभ्योऽर्थावबोधदर्श

मर्थावबोधस्त

नात्वनन्तदर्थस्यावृत्त्यपेक्षापुरुषाजपस्वाध्यायविधिसामर्
र्थ्याद्वादरस्वीकरणायावृत्तिःकल्पनेनार्थावबोधसा
मर्थ्यादध्ययनस्यावृत्एववाधीयमानावाप्तिपर्यंतव्यापार
स्यमुख्ययावृत्त्याभिधायकःसकृदुच्चारणादौगौण्याऽवृत्त्या
वृत्तिसिद्धिरितिनन्वेवदस्यैवात्यनिरपेक्षतयाविचारहेतु
त्ववदनुभाष्यकारोध्ययनविधेरेवविचारमाहेतिचोदयति
नन्वेवमधीतोवेदइतिसत्यंविचारस्यप्रयोजकोत्तरविधे
प्रदर्शनद्वारेणाविचारहेतुंस्वाध्यायोध्ययनविधिविधे
यत्वाद्वारेणेतिपरिहरतिसत्यंतथैवतदित्यादिनाननुस्वा
ध्यायोध्यापातप्रतिपन्नोत्तरविधिरनिश्चितःकथंविचारंप्रयुक्त
इतितदाहाधीतवेदोह्यवश्यकरणीयानीत्यापातप्रतिप
न्नानामुत्तरनित्यविधीनामनुष्ठेयनिर्णयेच्छानसापेक्षत्वा
न्निर्णयायविचारप्रयोजकत्वमितिकाम्यकर्मविचार
मप्यधीतवाक्यफलकामनैवप्रयुंक्तेनन्वुकाविधिप्रयुक्तिक
ने

स्यत्वादृष्टमध्ययनविधिप्रयुक्तिकल्पनं विचारस्य न विधे
यत्वेनोपकारित्वातिरिक्तस्य विचारस्याप्रयोजकत्वादध्यय
नविधेरित्युक्तत्वाद् दृष्टावबोधफलत्वाभावात् अवघात
वृत्तिवत्फलापेक्षयापि न विचारविधिरित्युक्तत्वादुत्तरविधिवि
धेयोपकारित्वाद्विचारस्य तत्प्रयुक्तिः संभवति प्रातिवाक्यं निर्ण
यज्ञानभेदाद्विधिभेदो न विरुध्यते न्यायानामनुष्ठानस्या
प्यध्ययनविधिप्रयोजनत्वं स्यात्स्वर्गादिसिद्धिपर्यंतत्वात् अध्य
यनविधिफलस्य ननु अध्ययनमनुत्तरविधिप्रयुक्तं किं न स्या
त् अध्ययनमन्तरेण विचारनिर्णययोरनुष्ठानाद्यसिद्धेरि
ति तत्राह तत्ः प्रागध्ययनादप्राप्तेरिति अध्ययनादुत्तरं प्राग
विधीनामप्राप्तेः नाध्ययनप्रयोजकत्वमित्यर्थः अध्य
नाविधिष्वसंध्योपासनाविधिवार्त्तादिभ्यः श्रूयमाणाः प्र
वर्त्तयन्ति न च सकलोत्तरविधीनामध्ययनात्प्राक्प्रवर्त्तनं
संभवतीत्युक्तं अस्तु तर्हि ब्रह्मज्ञानस्यापि त्रैवर्णिकाधिकृत्तो

दि

विवर० नत्वनित्यविधिप्रयुक्तएव विचार इतिनेत्याह नतथा ब्रह्म ट०पा०
२६ ज्ञानमिति नच धर्मब्रह्मविभागोस्ति धर्मस्यैतिन्याग्निहोत्रवि ३
धिरेवब्रह्मविचारपर्यापानदर्शनेनैवविविक्तमूलवस्तुवि
26 षयत्वात् तस्मादित्यवांतरप्रकरणोपसंहारः नदेवमिति
महाप्रकरणोपसंहारः नन्वोंकारश्चाथशब्दश्च द्वावेतौ ब्रह्म
णः पुरा कंठं भित्त्वा विनिर्यातौ तस्मात्मांगलिकावुभावि
तिमंगलार्थत्वादथशब्दस्य प्रारब्धारंभे चाशिष्टाचारपरिपाल
नाय विघ्नोपशांतये च मंगलाचरणं कर्तव्यमिति तदर्थोथश
ब्दइतिनेत्याह मंगलस्यार्थेति तत्रावन्मांगल्यं जिज्ञासायाः कार्ते
करणकर्मभावेन वाक्यार्थत्वेन कर्त्री चान्यतमभावे प्रमाणा
भावात् कारकाणां तत्रासतां विद्यमानत्वाच्च नापिसमानाधिकर
णान्वयो ब्रह्मजिज्ञासा मंगलमिति प्रशंसापरतया र्थवादत्वप्रसं
गात् तदुक्तं व्यर्थ एव मंगलाचरणमिति तत्राह श्रुतिमात्रोपयो
गादिति तदुप्रकृतार्थादर्थादर्थान्तरविवक्षायामप्यथशब्दः प्रयुज्य

तैयथा पर्यायान्तरेणाभिहितं पर्यायान्तरं विवक्षया ब्रवीत्यथैवं मन्यस इति
तत्पर्यायप्रश्न इति चोदयति तत्प्रक्रियमाणादित्यादिना हे
तुफलभावेनातत्कार्याभिधाने प्रकृतादर्थात्पर्यायान्तरत्वमन्तर्गतं तत
यासिद्ध्यतीति नत्प्रत्यवकाव्याभीतोपरि हेतुनान्तर्कार्यं ह्यानिरि
च्यत इति तत्त्वपर्यायान्तरं त्वमेवाभिधायानन्तर्यमन्तर्गतं किमिति
न गृह्यत इति चोदयति कथमिति तत्राकिंनियमेन पूर्ववृत्ततया
हेतुस्ततो वस्तुविशेषो विधोत्पत्तौ किं वा यत्किंचित्पूर्ववृत्तमपे
क्ष्यत इति तत्र न तावत्प्रथमः कल्पः आनन्तर्याभिधानमत्र सा
हेतुतया पूर्ववृत्तवस्तुविशेषावनियमासिद्धेरित्याह एवं तत्प्रक्रिय
माणस्यानियमेन पूर्ववृत्तत्वमिति अथापेतरः कल्पस्तत्राह अन्यथा
यस्मिन्कस्मिंश्चिदिति तत्त्वानन्तर्यमपि हेतुतया पूर्ववृत्तेन नावग
म्यते सत्यम् अपि कालकारणात्फलस्यानन्तर्यमेवमुख्यं भवत्यव्य
वधानाद्व्यभिचाराद्वा हेतुफलयोस्त्वानन्तर्यं कदाचिद्व्यभिचर
ति कदाचिद्व्यवधीयते चेत्तिगौणमेव स्यात्तस्मान्मुख्यानन्तर्याभि

विवर० धानेनाहवृत्तेउक्तफलकारसेव घोतितेष्वंतरभावो ष्वंतर्भवति र०पा०

२७ नार्थंतरामिधानेमरव्यमानंतर्यमंतर्भवति इत्युपसंहरतिकृतो ३

हेतुभूतोर्थापेक्षितव्य इति उक्तोर्थेभाष्यमवतारयति तदेतत्

दाहेति ननुफलचेद्धृस्यते किंउक्तफलकारसावगमेननाधिका

रिविशेषणात्वेनफलपर्यंते घ्यायाविचाराद्विप्रवृत्तौसंनिपत्य

पेक्षत्वादित्याहसांतिचानंतर्यार्थेत्वइति ननुप्रज्ञातमेवह

वतिर्वृत्तंधर्मजिज्ञासायास्तत्रेइत्याशंक्याहस्वाध्यायानंतर्यंत्वस

मानमिति भाष्यार्थंविवृणोति येनाविनानियमेनेत्यादिना

योजनांतरमाहअथवेति नउक्तफलकारसामित्यर्थः ननुएका

ध्ययनविधिप्रयुक्तस्वाध्यायाध्ययनस्यैकमोक्षप्रयोजनेवक्तार

व्याध्ययनविधिप्रयुक्तत्वाभावेपिकृत्स्नवेदार्थविचारस्यैकफ

लप्रयुक्तत्वात् क्रमेणज्ञानविचारयोरन्योन्योपकार्योपकारकभावे

नैकफलशेषत्वादुपकारकधर्मावबोधानंतर्यमुपकार्यब्रह्माव

बोधस्योचितं इतिचोदयति नन्विहकर्मावबोधानंतर्यविशेष इति

च्या

धर्मब्रह्मविचारयोरुपकार्योपकारकभावं दर्शयति तथाच वृत्तं
तरेवारीतिमिति अधिकारः प्रवृत्तिः संस्कारः फलं प्रवृत्तिपरंपर
याफलपरंपरयावेत्यर्थः ऽथवा संस्कार इति कर्मभिः प्रकृत्य संस्का
